# shrI hariharAtmajAShTakam

# શ્રીહરિહરાત્મજાષ્ટકમ્ અથવા શાસ્તુઃ ગીતાષ્ટકમ્

## Document Information

Text title : hariharaatmajaashhtakam / shAstuH gItAShTakam / harivarAsanam shAstAShTakam / ayyappa nidrAstotram

File name : hariharaatmajaashhtakam.itx

Category : aShTaka, deities_misc, ayyappa, stotra

Location : doc_deities_misc

Author : Kumbakudi Kulathur Iyer

Transliterated by : Karthik Raman, Antaratma antaratma at Safe-mail.net

Proofread by : Karthik Raman, Antaratma, PSA Easwaran

Latest update : July 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2022

*sanskritdocuments.org*

# શ્રીહરિહરાત્મજાષ્ટકમ્ અથવા શાસ્તુઃ ગીતાષ્ટકમ્

હરિવરાસનં વિશ્વમોહનં
 હરિદધીશ્વરમારાધ્યપાદુકમ્ ।
અરિવિમર્દનં નિત્યનર્તનં
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૧॥

શરણકીર્તનં ભક્તમાનસં
 ભરણલોલુપં નર્તનાલસમ્ ।
અરુણભાસુરં ભૂતનાયકં
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૨॥

પ્રણયસત્યકં પ્રાણનાયકં
 પ્રણતકલ્પકં સુપ્રભાઞ્ચિતમ્ ।
પ્રણવમન્દિરં કીર્તનપ્રિયં
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૩॥

તુરગવાહનં સુન્દરાનનં
 વરગદાયુધં વેદવર્ણિતમ્ ।
ગુરુકૃપાકરં કીર્તનપ્રિયં
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૪॥

ત્રિભુવનાર્ચિતં દેવતાત્મકં
 ત્રિનયનપ્રભું દિવ્યદેશિકમ્ ।
ત્રિદશપૂજિતં ચિન્તિતપ્રદં
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૫॥

ભવભયાપહં ભાવુકાવહં
 ભુવનમોહનં ભૂતિભૂષણમ્ ।
ધવલવાહનં દિવ્યવારણં
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૬॥

કલમૃદુસ્મિતં સુન્દરાનનં
 કલભકોમલં ગાત્રમોહનમ્ ।
કલભકેસરી વાજિવાહનં
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૭॥

શ્રિતજનપ્રિયં ચિન્તિતપ્રદં
 શ્રુતિવિભૂષણં સાધુજીવનમ્ ।
શ્રુતિમનોહરં ગીતલાલસં
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૮॥

॥ ઇતિ શ્રી હરિહરાત્મજાષ્ટકં સમ્પૂર્ણમ્ ॥

શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા ।

શાસ્તાષ્ટકમ્
અય્યપ્પ નિદ્રાસ્તોત્રમ્

There is extension found in some places

જયવિયત્પતે જયજગત્પતે
 જયદયાનિધે જયજયાર્યને ।
ભૂતનાયક લોકનાયક
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૯॥

પ્રણવમન્ત્રમે પ્રભવમૂલમે Malayalam words with મે
 બ્રહ્મદૈવમે ધર્મદૈવમે ।
જ્યોતિરૂપમે નાદરૂપમે
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૧૦॥

અદ્ભુતાકૃતે ચિન્મયાકૃતે
 નિર્ગુણાકૃતે નિર્મલાકૃતે ।
મઙ્ગલાકૃતે મોહનાકૃતે
 હરિહરાત્મજં દેવમાશ્રયે ॥ ૧૧॥

અન્નનાયક પ્રાણનાયક
 હૃદયનાયક જ્ઞાનનાયક ।
સચ્ચિદાત્મક વિશ્વનાયક

હરિહરાત્મજં દેવમાશ્રયે ॥ ૧૨॥

જનનકારક વિશ્વરક્ષક
નાશકારક વેદકારક ।
મોહિનીસુત ધૂર્જટીસુત
હરિહરાત્મજં દેવમાશ્રયે ॥ ૧૩॥

વૈષ્ણવેશ્વર શૈવપૂજિત
મણ્ડલેશ્વર પણ્ડિતેશ્વર ।
કલિયુગેશ્વર કેરલેશ્વર
હરિહરાત્મજં દેવમાશ્રયે ॥ ૧૪॥

શ્યામકોમલ કુટિલકુન્તલ
જિતરુચિર્મુખ મદનમોહન ।
અસિધનુર્ધર મકુટભૂષિત
હરિહરાત્મજં દેવમાશ્રયે ॥ ૧૫॥

વિપિન્નમધ્યક શ્વાપતાવૃત
મૃગયતત્પર ચટુલલોચન ।
અશ્વવાહન સૈન્યસેવિત
હરિહરાત્મજં દેવમાશ્રયે ॥ ૧૬॥

શબરિવાસને ધ્યાનનિષ્ઠને
ન્યાસવૃત્તને સર્વશક્તને । Malayalam words with ને
વરદનય્યને પરમદૈવમે
હરિહરાત્મજં દેવમાશ્રયે ॥ ૧૭॥

ભકતવત્સલ શક્તિવર્ધક
શત્રુનાશક મુક્તિદાયક ।
પાહિપાહિમાં પાહિપાહિમાં
હરિહરાત્મજં દેવમાશ્રયે ॥ ૧૮॥

શરણમય્યપ્પા સ્વામિ શરણમય્યપ્પા ।

હરિહરાત્મજાષ્ટકમ્

શાસ્તુઃ ગીતાષ્ટકમ્

હરિવરાસનમ્ શાસ્તાષ્ટકમ્

હરિહરાત્મજ આશયાષ્ટકમ્

અય્યપ્પ નિદ્રાસ્તોત્રમ્

Encoded by Karthik Raman, NA

Proofread by Karthik Raman, Antaratma, NA, PSA Easwaran

---

*shrI hariharAtmajAShTakam*

pdf was typeset on September 14, 2022

Please send corrections to *sanskrit@cheerful.com*